# 10 - दशम दशकम्
# सृष्टि भेद वर्णनम्

वैकुण्ठ वर्धित बलोऽथ भवत् प्रसादात्
अम्भोज योनि रसृजत् किल जीव देहान् ।
स्थास्नूनि भूरुह मयानि तथा तिरश्चां
जातीर् मनुष्य निवहा नपि देव भेदान् ॥ ॥10-1॥

मिथ्या ग्रहास्मि मति राग विकोप भीति:
अज्ञान वृत्ति मिति पञ्चविधां स सृष्ट्वा ।
उद्दाम तामस पदार्थ विधान दून:
तेने त्वदीय चरण स्मरणं विशुद्ध्यै ॥ ॥10-2॥

तावत् ससर्ज मनसा सनकं सनन्दं
भूयस् सनातन मुनिं च सनत्कुमारं ।
ते सृष्टि कर्मणि तु तेन नियुज्यमाना:
त्वत्पाद भक्ति रसिका जगृहुर् न वाणीम् ॥ ॥10-3॥

तावत् प्रकोप मुदितं प्रति रुन्धतोऽस्य
भ्रूमध्यतो ऽजनि मृडो भव देकदेश: ।
नामानि मे कुरु पदानि च हा विरिञ्चेति
आदौ रुरोद किल तेन स रुद्रनामा ॥ ॥10-4॥

एकादशा ह्वयतया च विभिन्न रूपं
रुद्रं विधाय दयिता वनिताश्च दत्वा ।
तावन्त्य दत्त च पदानि भवत् प्रणुन्न:
प्राह प्रजा विरचनाय च सादरं तम् ॥ ॥10-5॥

रुद्राभिसृष्ट भयदाकृति रुद्र संघ
सम्पूर्यमाण भुवनत्रय भीत चेताः ।
मा मा प्रजास् सृज तपश्चर मङ्गलायेति
आचष्ट तं कमलभूर् भवदीरि-तात्मा ॥ ॥10-6॥

तस्याथ सर्ग रसिकस्य मरीचि रत्रिः
तत्राङ्गिराः क्रतुमुनिः पुलहः पुलस्त्यः ।
अङ्गा दजायत भृगुश्च वसिष्ठ दक्षौ
श्रीनारदश्च भगवान् भवदंघ्रि दासः ॥ ॥10-7॥

धर्मादिका नभिसृजन् अथ कर्दमं च
वाणीं विधाय विधि रङ्गज संकुलोऽभूत् ।
त्वत् बोधितैस् सनक दक्ष मुखैस् तनूजैः
उद्बोधितश्च विरराम तमो विमुञ्चन् ॥ ॥10-8॥

वेदान् पुराण निवहा नपि सर्वविद्याः
कुर्वन् निजानन गणात् चतुराननोऽसौ ।
पुत्रेषु तेषु विनिधाय स सर्ग वृद्धिम्
अप्राप्नुवन् स्तव पदाम्बुज माश्रितोभूत् ॥ ॥10-9॥

जानन् नुपाय मथ देह मजो विभज्य
स्त्री पुंस भाव मभजन् मनु तत् वधूभ्याम् ।
ताभ्यां च मानुष कुलानि विवर्धयंस् त्वं
गोविन्द मारुत पुरेश निरुन्धि रोगान् ॥ ॥10-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥